**PRE-BOARD / X / SANSKRIT / 2020-21**

अवधिः – होरात्रयम् पूर्णांकाः – **80**

सामान्यनिर्देशाः–

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
- अस्य प्रश्नप्रत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

प्रश्नस्वरूपम् –

'अ' – भागः (बहुविकल्पात्मकः) 40 अंकाः

'आ' –भागः (वर्णनात्मकः) 40 अंकाः

1. प्रश्नपत्रे द्वौ भागौ स्तः।
2. प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन एव लेखनीयानि।
4. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

'अ'– भागः ( बहुविकल्पात्मकाः प्रश्नाः ) 40 अंकाः

अनुप्रयुक्त–व्याकरणम् **25**

**Q1.** अधोलिखितवाक्येषु रेखांकितपदस्य सन्धिपदं सन्धिविच्छेदपदं वा चिनुत – (केवलं प्रश्नचतुष्टयम्) **1x4 = 4**

(i) निसर्गे स्यान्न समाविष्टा।

(अ) स्यान् + न (ब) स्यात् + न (स) स्याद् + न

(ii) पिता अस्य किं तपः + तेपे।

(अ) तपस्तेपे (ब) तपष्तेपे (स) तपश्तेपे।

(iii) सदाचारः विशेषतः पालनीयः।

(अ) सद् + आचारः (ब) सदा + चारः (स) सत् + आचारः

(iv) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

(अ) शरीरस्थो + महान् (ब) शरीरस्थः + महान् (स) शरीरस्थ + महान्

(v) व्याघ्रः + अपि सहसा नष्टः गलबद्धश्रृगालकः।

(अ) व्याघ्रोऽपि (ब) व्याघ्रो अपि (स) व्याघ्रोअपि

**Q2.** अधोलिखितवाक्येषु रेखांकितपदानां समास विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नचतुष्टयम्) **1x4 =4**

(i) <u>उपवनं</u> पादपैः शोभते।

(अ) वनम् समीपम् (ब) वनात् समीपम् (स) वनस्य समीपम्

(ii) <u>पिकः च काकः च</u> कूजतः।

(अ) काकपिकौ (ब) पिककाकौ (स) पिककाकम्

(iii) अहम् <u>देवाधिपतिः</u> शक्रः अस्मि।

(अ) देवाय अधिपति (ब) देवानाम् अधिपतिः (स) देवात् अधिपतिः

(iv) अयं बालकः <u>दिनं दिनं–इति</u> उद्याने विहरति।

(अ) प्रतिदिनम् (ब) प्रतिदिनात् (स) प्रतिदिने

(v) सर्वेषामेव मत्कृते महत्त्वं विद्यते <u>समयम् अनतिक्रम्य</u>।

(अ) यथासमयम् (ब) यथासमयः (स) उपसमयम्

**Q3.** अधोलिखितवाक्येषु रेखांकितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं विकल्पेभ्यः चिनुत – (केवलं प्रश्नचतुष्टयम्) **1x4 =4**

(i) अन्योऽपि <u>बुद्धिमान्</u> लोके।

(अ) बुद्धि + मतुप् (ब) बुद्धि + मत् (स) बुद्धि + मान्

(ii) संपत्तौ च विपत्तौ च महताम् <u>एकरूपता</u>।

(अ) एकरूप + टाप् (ब) एकरूप + ता (स) एकरूप + तल्

अथवा

यत्रास्ते सा <u>धूर्त + टाप्</u> तत्र गम्यताम्।

(अ) धूर्तम् (ब) धूर्तः (स) धूर्ता

(iii) विद्वांस एव लोकेऽस्मिन् <u>चक्षुष् + मतुप्</u> प्रकीर्तिताः।

(अ) चक्षुष्मान् (ब) चक्षुष्मतुप् (स) चक्षुष्मन्तः

(iv) तदेवाहुः महात्मानः <u>समत्वम्</u> इति तथ्यतः।

(अ) सम + तल् (ब) सम + त्व (स) सम + त्वम्

**Q4.** वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत । (केवलं प्रश्नत्रयम्) **1x3 = 3**

(i) सरिता – नमिते! अधुना त्वं किं ........................................?

(अ) क्रियते (ब) करोति (स) करोषि

(ii) सविता – श्वः मम परीक्षा अस्ति तदर्थं मया पाठः ............................।

(अ) स्मरति (ब) स्मर्यते (स) स्मरामि

(iii) सरिता – अहं तु ....................................आरोपयामि।

(अ) वृक्षम् (ब) वृक्षाः (स) वृक्षान्

(iv) सविता – शोभनम्! अधुना तु ........................ एकः लेखः लिख्यते।

(अ) अहम् (ब) मया (स) आवाम्

**Q5.** **प्रदत्तविकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत–** **1x4 = 4**

**(केवलं प्रश्नचतुष्टयम्)**

(i) सः 5:30 प्रातः —————— उत्तिष्ठति।

(अ) सपाद पंचवादने (ब) सार्ध पंचवादने (स) पादोन पंचवादने

(ii) पश्चात् सः 6:00 प्रातः ——————— स्नानं करोति।

(अ) षड् वादने (ब) सपाद षड् (स) सार्ध षड्वादने

(iii) सः 6:.45 प्रातः —————— प्रातराशं करोति।

(अ) पादोन सप्तवादने (ब) षड्वादने (स) पादोन षड्वादने

(iv) सः 2:00 अपराह्न्हे ——————— विद्यालयात् आगच्छति।

(अ) सार्ध द्विवादने (ब) सपाद द्विवादने (स) द्विवादने

(v) सः 8:15 रात्रौ ———————— भोजनं करोति।

(अ) सपाद-अष्टवादने (ब) सार्ध अष्वादने (स) अष्टवादने

**Q6.** **वाक्यानुगुणम् उचिताव्ययपदं चिनुत – (केवलं प्रश्नत्रयम्)** **1x3 = 3**

(i) प्रायः वृद्धाः ———————— भ्रमन्ति।

(अ) उच्चैः (ब) विना (स) शनैः

(ii) ——————— इदं श्रेयस्करम् ?

(अ) अपि (ब) इतस्ततः (स) तथा

(iii) सः —————— वाराणसीं गमिष्यति।

(अ) अद्य (ब) ह्यः (स) श्वः

(iv) गृहे ——————— कलहं मा कुरुत।

(अ) विना (ब) अपि (स) वृथा

**Q7.** **अधोलिखितवाक्येषु रेखांकितपदं अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत –** **1x3 = 3**

**(केवलं प्रश्नत्रयम्)**

(i) अहं ते किं प्रियं <u>करोति</u> ?

(अ) करोमि (ब) अकथयत् (स) करोषि

(ii) सः <u>चौरेण</u> बिभेति।

(अ) चौरात् (ब) चौरेन (स) चौरम्

(iii) तस्मिन् निशायाम् मम गृहे चौरः आगच्छत्।

(अ) तस्याम् (ब) तस्याः (स) तस्य

(iv) किं शकुन्तला अध्ययने रतः अस्ति।

(अ) रते (ब) रता (स) रताः

## पठितावबोधनम् 15

**Q8.** रेखाकिंतपदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत — **1x5 = 5**

(केवलं प्रश्नपंचकम्)

(i) फलच्छायासमन्वितः महान् वृक्षः सेवितव्यः।

(अ) कान् (ब) कीदृशः (स) कः

(ii) सिंहः सर्वजन्तून् दृष्ट्वा पृच्छति।

(अ) कम् (ब) कान् (स) कः

(iii) प्रस्तरतले लतातरुगुल्मा पिष्टाः न भवन्तु।

(अ) कुत्र (ब) के (स) कथम्

(iv) मयूरस्य पिच्छानां सौन्दर्यम् अपूर्वम् अस्ति।

(अ) काम् (ब) कासाम् (स) केषाम्

(v) सुराधिपः ताम् अपृच्छत्।

(अ) काम् (ब) कम् (स) कासाम्

(vi) मूर्खाः मूर्खैः सह अनुव्रजन्ति।

(अ) के (ब) कैः (स) केन

**Q9.** अधोलिखितवाक्येषु रेखाकिंतपदानां प्रसंगानुकुलं उचितार्थं चिनुत – **1x4 = 4**

(केवलं प्रश्नचतुष्टयम्)

(i) यः इच्छति आत्मनः श्रेयः।

(अ) कल्याणम् (ब) धनम् (स) गृहम्

(ii) एकः दुर्बलः बलीवर्दः भूमौ पपात।

(अ) गौः (ब) धेनुः (स) वृषभः

(iii) नराणां प्रथमः शत्रुः आलस्यम् अस्ति।

(अ) मानवः (ब) मित्रम् (स) रिपुः

(iv) सर्वेषु अपत्येषु जननी तुल्यवत्सला।

(अ) सन्तानेषु (ब) जनेषु (स) पुत्रीषु

(v) सः व्याघ्रः तथा कृत्वा काननं ययौ।

(अ) गृहम् (ब) नगरम् (स) वनम्

**Q10.** भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत – **1x6 = 6**
(केवलं प्रश्नषट्कम्)

(i) ' स एव वह्निर्दहते शरीरम् 'अत्र कर्तृपदं किम् ?

(अ) सः (ब) वह्निः (स) शरीरम्

(ii) 'कश्चन् निर्धनः जनः भूरि परिश्रम्य किंचित वित्तमुपार्जितवान् ' अस्मिन् वाक्ये विशेष्यपदं किम् ?

(अ) निर्धनः (ब) कश्चन (स) जनः

(iii) ' किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ' अत्र क्रियापदं किम् ?

(अ) मामेवं (ब) तुदन्ति (स) सर्वे

(iv) ' मार्गे गहनकानने एकं व्याघ्रं ददर्श अत्र ' वने ' इत्यर्थे किं पर्यायपदं प्रयुक्तम् ?

(अ) मार्गे (ब) कानने (स) गहन

(v) ' दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्' अस्मिन् वाक्ये विशेषणपदं किम् ?

(अ) दुर्दान्तैः (ब) अमुना (स) दशनैः

(vi) 'यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।' अस्मिन् वाक्ये 'शनैः' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(अ) तर्हि (ब) सत्वरम् (स) यदि

(vii) ' बहूनि अपत्यानि मे सन्ति ' अत्र विशेषणपदं किम् ?

(अ) मे (ब) अपत्यानि (स) बहूनि

(viii) 'तस्य मृतशरीरं राजमार्गं निकषा वर्तते।' अत्र ' निकटे ' इत्यर्थे किं पदं दत्तम् ?

(अ) मृतशरीरं (ब) राजमार्गं (स) निकषा

## ' आ ' भागः ( वर्णनात्मकाः प्रश्नाः) 40 अंकाः

## अपठितावबोधनम् 10

**Q11.** **निम्नलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** 10

भारतीयजनानां पाश्चात्यं प्रति महत् आकर्षणम् आसीत् , अस्ति , भविष्यति अपि च। विचारणीयः विषयः तु अयमेव अस्ति यत् किमर्थं जनाः पाश्चात्यं प्रति आकर्षिताः भवन्ति? किं स्वदेशे सर्वसुविधाः न सन्ति? किं कारणम् अत्र? अत्रापि आवासव्यवस्था तादृशी एव उत्तमा अस्ति यादृशी अन्येषु देशेषु च। यदा सः कालः आगमिष्यति तदा जनाः विदेशगमनस्य इच्छां त्यक्त्वा स्वदेशे एव तिष्ठन्तः स्वज्ञानस्य प्रयोगं कृत्वा देशम् उन्नेष्यति। देशः तु मातुः इव भवति। यः सर्वेभ्यः सर्वदा यच्छति एव अपेक्षते किञ्चिदपि न। अतः देशस्य सम्मानम् अपि तादृशमेव भवेत् यादृशं मातुः सम्मानं भवति। अतः कथ्यते– " जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।"

अ **एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **1x2 = 2**

(i) के पाश्चात्यं प्रति आकर्षिताः सन्ति ?

(ii) जनाः कस्य प्रयोगं कृत्वा देशम् उन्नेष्यति ?

(iii) अत्रापि आवासव्यवस्था कीदृशी अस्ति ?

आ **पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** **2x2 = 4**

(i) कः विचारणीयः विषयोऽस्ति ?

(ii) जनाः कदा देशम् उन्नेष्यति ?

(iii) मातुः सम्मानं कदा भवति?

इ **अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

ई यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) **1x3 = 3**

(i) ' उन्नेष्यन्ति ' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) जनाः (ब) सर्वसुविधाः (स) आकर्षिताः (द) कालः

(ii) ' गमिष्यति ' इत्यस्य विपरीतपदं किम् ?

(अ) भविष्यति (ब) उन्नेष्यन्ति (स) आगमिष्यति (द) अस्ति

(iii) ' आकर्षणम् ' इति पदस्य अनुच्छेदे किं विशेषण–पदम् ?

(अ) तादृशी (ब) उत्तमा (स) महत् (द) यादृशी

(iv) 'आवासव्यवस्था तादृशी एव उत्तमा अस्ति' अस्मिन् वाक्ये किं क्रियापदम् ?

(अ) भवन्ति (ब) सन्ति (स) उन्नेष्यन्ति (द) अस्ति

## रचनात्मक–कार्यम् **15**

**Q12.** **भवान् महेशः। भवतः विद्यालये सर्वशिक्षाकार्यक्रमः आयोजितः। स्वविद्यालयस्य कार्यक्रमविषये मित्रं रमेशं प्रति लिखिते पत्रे मंजूषातः पूरयित्वा पत्रं पुनः लिखत।** **½ x10=5**

गृहसंख्या–25

अ–1 मोतीनगरम्

(1) ——————

तिथिः ————

प्रियमित्र (2) ——————

सप्रेम नमो नमः।

अत्र कुशलं तत्रास्तु। मित्र! अस्माकं विद्यालये (3) ————— सर्वशिक्षा–कार्यक्रमः आयोजितः। वयं छात्राः भिन्नवर्गेषु विभक्ताः भूत्वा विद्यालयस्य समीपस्थानि (4) —————— गतवन्तः। तत्र लघुकुटीरे (5) —————— निरक्षरान् जनान् शिक्षायाः महत्त्वं बोधितवन्तः। बालकान् विद्यालये प्रेषणार्थं तान् (6) —————— । अस्माकं कार्यक्रमस्य प्रभावेण इदानीम् अस्माकं विद्यालये (7) ————— परिमिताः (8) —————— बालकाः पठितुम् आरब्धवन्तः। भवान् स्वविद्यालयस्य (9) —————— विषये लिखतु।

भवतः प्रियमित्रम्

(10) ———————

मंजूषा

| |
|---|
| गतगुरुवासरे , पंचविंशतिः , निवसतः , दिल्लीतः, निर्धनाः, रमेशः , कार्यक्रमस्य, अशिक्षितक्षेत्राणि , महेशः , प्रेरितवन्तः |

**Q13.** अधोदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तपदानां सहायतया पंचवाक्यानि संस्कृतेन लिखत– **1 x 5= 5**



**मंजूषा**

| |
|---|
| नद्याम्, वृक्षाः, बालौ, रजकः, स्नातः, शुष्यन्ति, क्षालयति, शिलापट्टे, वस्त्राणि, पर्वताः, रमणीयः, वर्धयति |

अथवा

मंजूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पंचभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–

" वृक्षाणां महत्त्वम् "

**मंजूषा**

| |
|---|
| प्रकृतेः शोभा, पर्यावणस्य, रक्षकाः, यच्छन्ति, प्राणवायुम्, औषधम्, काष्ठम्, छायाम्, आश्रयस्थलम्, विहगाानाम्, फलानि, सहायकाः। |

**Q14.** अधोलिखितवाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्) **1x5 = 5**

1. गायत्री मंत्र से बुद्धि शुद्ध होती है।
2. ईश्वर का जप निरंतर करना चाहिए।
3. वह सदा पाठ्यक्रमों से परिचित होगा।
4. हमें अच्छे लेखकों की पुस्तकें पढ़नी चाहिए।
5. शिक्षा विनम्रता देती है।
6. अनुशासन ही जीवन का आधार है।
7. मेरा भाई दशवीं कक्षा में पढ़ता है।

**पठित–अवबोधनम्** **15**

**Q15.** अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– **3**

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेहं आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच – "रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरितायाः मंजूषायाः ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

अ 1. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½ x 2=1

(i) आरक्षी कीदृशः आसीत् ?

(ii) अभियुक्तः कीदृशः आसीत् ?

(iii) कः भारवेदनया क्रन्दति स्म ?

आ 2. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 1x2 = 2

(i) अभियुक्तस्य क्रन्दनं श्रुत्वा प्रसन्नः आरक्षी तं किम् उवाच ?

(ii) अभियुक्तः किमर्थं क्रन्दति स्म ?

(iii) उभौ शवमानीय कुत्र स्थापितवन्तौ ?

**Q16.** अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– **3**

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च।।

अ 1. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½ x 2=1

(i) जनः आत्मनः किम् इच्छति ?

(ii) मनुष्यः कति सुखानि इच्छति ?

(iii) कीदृशं कर्म न कुर्यात् ?

आ 2. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 1x2 = 2

(i) कः परेभ्यः अहितं न कुर्यात् ?

(ii) जनः कस्य श्रेयः प्रभूतानि सुखानि च इच्छति ?

(iii) मनुष्यः केभ्यः अहितं कर्म न कुर्यात् ?

**Q17.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। **3**

काकः – रे परभृत! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राटः काकः।

गजः – समीपतः एवागच्छनः अरे! अरे! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।

वानरः – अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)

अ 1. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½ x 2=1

(i) काकः कस्य सन्ततिं पालयति ?

(ii) करुणापरः पक्षिसम्राटः कः ?

(iii) वानरः कस्य पुच्छं विधूय वृक्षोपरि आरोहति ?

आ 2. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 1x2 = 2

(i) गजः आत्मनः विषये किं कथयति ?

(ii) वानरः किं कृत्वा वृक्षोपरि आरोहति ?

(iii) काकः किं वदति ?

**Q18.** **मंजूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत –** **½ x4** = 2

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

अन्वयः – (1) ———— हि (2) मनुष्याणां ——— महान् रिपुः
(अस्ति) उद्यमसमः (3) ———— न अस्ति यं (4) ———
(मनुष्यः) न अवसीदति।

मंजूषा

| |
|---|
| कृत्वा , शरीरस्थः , बन्धुः , आलस्यं |

अथवा

**मंजूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–**

अमन्त्रमक्षरं नास्ति , नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति, योजकस्तत्र दुर्लभः।।

भावार्थः – अस्मिन् संसारे किंचित् (1) .............................. ज्ञानम् (अक्षरं) न भवति। एवमेव औषधिगुण–रहितं वृक्षाणां (2) ..................... अपि न भवति। योग्यतया रहितः (3)................... न कथ्यते, तेषां सर्वेषां गुणैः सह (4) ...................... संसारे अतीव दुर्लभो भवति।

मंजूषा

| |
|---|
| मूलम् , योजकः , अमन्त्रम् , पुरुषः |

**Q19.** **अधोलिखित–कथांशं समुचित–क्रमेण लिखत —** **½ x 8=4**

1. व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।
2. प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती उवाच।
3. जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।
4. मार्गे सा एकं व्याघ्रं अपश्यत्।
5. व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती – अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।
6. बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।
7. त्वं व्याघ्रत्रयम् आनेतुं प्रतिज्ञाय एकमेव आनीतवान्।
8. गलबद्धशृगालकः व्याघ्रः पुनः पलायितः।